Chapter-4

SMT. HANSA MEHTA LIB. The M. S. University of Baroda

# काव्यशास्त्रेषु नायक-नायिका भेद विमर्श:

# चतुर्थोऽध्याय:

# नायकभेद विमर्श:

धीरललित: निश्चित: कलासक्त: विलासयुक्त: भवति। धीरललित नायक: चिन्तारहिता नित्यगीतादि कलासक्त: भोगविलासयुक्त: शृंगाररसमंडिता: सुकुमार: कोमलस्वभावयुक्ता: भवति। द्वितीय: धीरप्रशांत: यस्मिन प्रकरणे ब्राह्मणोवा वैश्य नायकरुपेण भवति। स धीरशांत नायक: मालतीमाधवे माधवा: मृच्छकटिके चारुदत:। धीरशांत नायकत्वेन परिगण्यन्ते। तृतीय: धीरोदत: धीरोदात्तनायक: महासत्व: अत्यंत गंभीर: क्षमाशील: आत्मश्लाधारहित: अहंकाररहित: दृढव्रता: न्यायप्रियो भवति[1]। उत्तरामचरिते रामचंद्र: अभिज्ञानशाकुंतले दुष्यन्ता: धीरोद्धत नायकस्य धीरोद्धत धीरोद्धत नायक: दर्प, मात्सर्ययुक्त, मायावी, छद्म, परायण:, अहंकारी, चञ्चल:, चण्डां: क्रोधी आत्मश्लाधायुक्ता भवति[2]। परशुराम: तथा भीमसेन: धीरोद्धत नायकस्य उदाहरणम्।

संस्कृत नाटकस्य अथवा काव्यस्य समान्य विषया: श्रृंगार रस मंडनम् एव। यदा नायका: नूतनायाम् नायिकायाम् अनुरक्तो भवति। तदा सह कनिष्ठा नायका भवति। पूर्वा: जयेष्ठ नायकायाम् दक्षिण अथवा शठ नायक: अनुरक्तो भवति[3]। अनेकाभि: नायकाभि: सह अनुरक्तो दक्षिण नायक: अन्याम् नायिकाम् प्राप्य पूर्वाम् नायिकाम् प्रति सम्यकेन व्यवहरति तथा सह उदासीन: भवति[4]। अनेन सह सठ नायकत्वेन बोध्यते। य: अपराधम् करोति नि:शंकम् भ्रमति लर्ज्जितो न भवति। सह धृष्ट नायका: एकस्याम् नायकायाम् एव अनुरक्ता: अनुकुल नायक: एवम् प्रत्येकस्य अनुकुल, दक्षिण धृष्ट, सठ भेदात षोदश प्रकारका: नायका: भवन्ति। तस्य उत्तम मध्यम, अधम् भेदगणनया अष्टचत्वारि त्रिंशत भेदा: भवन्ति[5]। शोभा, विलास,

---

1 साहित्यदर्पण - अविकत्थन: क्षमावानतिगम्भीरो महासत्व:।
स्थेयातिगुढमानो धीरोदतो दृढ्व्रत: कथित: ॥ 3 ॥ 32 ॥

दशरुपक - महास्त्वोडतिगम्भीर: क्षमावानविकत्यन:।
स्थिरो निगूढाहङ्कारो धीरोदतो दढ्व्रत: ॥ 2 ॥ 4, 5॥

नाटकदर्पण - धीरोदतोडतिगम्भीरो न्यायी सत्वी क्षमी स्थिर: ॥ प्रथम विवेक, का. 8 सू. 7।

2. दशरुपक - दपमात्सर्यभूयिष्ठो मायाच्छ्म्रपरायण:।
धीरोध्दृतस्त्वहङ्कारी चलश्चण्डो विकत्थन: ॥ 2 ॥ 5-6 ॥

साहित्यदर्पण - मायापर: प्रचण्डश्चपलोडहङ्कारदर्पभूपिष्ठ:।
आत्मश्लाधानिरतो धीरैर्धीरोध्दृत: कथित: ॥ 3 ॥ 33॥

नाट्यदर्पण - धीरोध्दृतश्चलश्चण्डो दर्पी दम्भी विकात्थन: ॥ प्रथम विवेक, का. 8 सू. 7।

3. दशरुपक - स दक्षिण: शठो धृष्ट: पूर्वा प्रत्यन्यया हृत: ॥ 2।6

4. वहि - दक्षिणोडस्या सहृदय: । 2 / 7।

5. दशरुपक - 3 ।38

माधुर्य, गाम्भीर्य, स्थैर्य, तेज ललित, औदार्यादि गुणयुक्तः मंडितो भवति। किरातार्जुनीयम् नाटकस्य नायक : अर्जुनः धीरोदात नायकः अर्जुनस्य शारीरिक वर्णनम् पिङ्गलवर्ण भावविभावादिनाम् समिलितम् संयोजनम्। उपमान विधानस्य प्रस्तुतिवर्णनम् अस्य नाटकस्य स्वभाव वर्णयति। किरातार्जुनीये अर्जुनः सामान्य मनुष्य रुपेण चित्रितम् दृश्यते। किरातार्जुनीय नाटके अर्जुनः स्वाभिमानी निर्भयः शास्त्रोक्त नियमपालने इतः दृणःप्रतिज्ञ व्यक्तित्वेन चित्रिताः दृश्यते।

शिशुपालवध नाटके यत्र श्रीकृष्णस्य वर्णनम् कृतम् वर्तते। तत्र-तत्र नाटकस्य सौंदर्यम् अतीव रमणीयत्वेन दृश्यते। महाभारते यत्र श्रीकृष्णस्य ईश्वररुपाः अभिव्यक्तो भवति तत्र माधवस्य शिशुपालवधे चित्रितम् । श्रीकृष्णस्य ईश्वरत्वअपेक्षया नृपोत्तम नरत्वम अधिकम् वर्तते। श्रीकृष्णः उदारचरितः दुष्टानाम शत्रु साधुनाम् मित्रम् आदर्श निपत्वयम् शिशुपालवधे श्रीकृष्णः धीरोध्यृति नायकन्वेन निरुपितम् वर्तते। श्रीकृष्णस्य सौंदर्यम् श्यामवर्ण युक्तम् उपमान विधानेन प्रस्तुतम् वर्नने।

अस्मिन्नध्याये नायक-विमर्शः श्रृङ्गार-दृष्ट्या प्रस्तुतः। तदधिकृत्याभिनवगुप्तो व्याख्यातवान्-- इह कामोपचारः पूर्वदर्शितः कामश्च स्त्रीपुरुषहेतुक इत्यक्तम्। कामोपचारश्च श्रृङ्गारपयवसायी नायक-विशेष एवेति नायकभेदा वक्तव्याः।[1]

नाट्यशास्त्रे नायकपदस्य त्रिविधोऽभिप्रायो निर्दिष्टः (1) प्रधाननायकः (2) प्रधाननायकः, प्रतिनायक, नायिका, पताकानायकश्चेति मध्यमसामान्यवचनम् तथा (3) कश्चिदपि कथा-पुरुषः अमात्यः, कंचुकी, विदुषकः, भूत्यः, चेटी, चट इत्यादयः इति महासामान्य-वचनम्।

## प्रधान - नायकः

भरतेन प्रधाननायको लक्षितः --

व्यसनी प्राप्य दुःखं वा युज्यतडभ्युदयेन यः।
कथापुरुषमाहुस्तं प्रधानं नायकं बुधाः॥ 24.22

1. ना० शा० 24.1

सोऽयं प्रधाननायको धनञ्जयेनाधिकारीति प्रोक्तः

अधिकारः फलस्वाम्यमधिकारी च तत्प्रभुः।
न्निर्वर्त्यमभिव्यापि वृतं स्यादाधिकरिकम् ॥ 1.12

प्रधाननायकोऽयं धीरोदातः, धीरललितः, धीरप्रशान्तः, धीरोद्धतश्च चतुर्विधो भवति।[1] इमे विशेषा नायकस्य प्रकृति, गुणं, उपलब्धिं च समीक्ष्य निर्धारिताः।

भरतानुसारेणं प्रकृतिस्त्रिविधा भवति – उतमा, नध्यमा, अधमा च। सेयं प्रकृतिर्नादीनां श्रृच तत्प्रभुङ्गारपरायणतामधिकृत्य परिभाषिता।[2] श्रृगार एव रोचिष्णुतमो नायकानाम्। भरतस्तु आभ्यन्तरं कामोपभोगमेव नटके सविशेषं समर्थयति।[3] सोऽयं कामोपभोगो राज्ञामेवोचितोनाटकेषु।[4]

पूर्वोक्त विवरणेन स्पष्टं प्रतीयते यत् भरतो राजानमेव नाटकस्य नायकं मत्वा तस्य लक्षणं विशदीकरोति –

बलवान् बुद्धि – सम्पन्नः सत्यवादी जितेन्द्रियः।
दक्षः प्रगल्भो धृतिमान् विक्रान्तो मतिमाञ्छुचिः॥
दीर्धदर्शी महोत्साहः कृतज्ञः प्रियवाड् मृदुः।
लोकपालव्रतधरः कर्ममार्गविशारदः॥
उत्थितश्चाप्रमतश्च वृद्धसेव्यर्थशास्त्रवित्।

1. ना० शा० 24.17
नायकानामिद चातुर्विध्यं परवर्तियोजनं प्रतिभाति। भरतस्तु मूलतो नायकाना विभाजनमुतममध्यमाकोटिषु समर्थयति। 18 34। नाटक उदातेन नायकेन भवितव्यम्। न तत्रापि धीरोदातस्य निर्देशनम्। अन्यषु रुपकविधेष्वपि धीरविशेषषितनायका न निर्दिष्टास्तेन।
2. यः स्त्रीपुरुषसयोगो रतिसम्भोगकारकः। स श्रृङ्गार इति ज्ञेय उपचारकृतः॥
भूयिष्ठमेव लोकोऽयं सुखमिच्छति सर्वदा। सुखस्य हि स्त्रियो मूल नानाशीलश्च ताः पुनः॥ 22.88.88
3 कामोपभोगो द्विविधो नाटयधर्मेऽभिधीयते। बाह्याभ्यन्तरतश्चैव नारीपुरुषसश्रयः॥ 2 148
आभ्यन्तरः पार्थिवाना स च कार्यस्तु नाटके। बाह्यो वेश्यागतश्चैव स च प्रकरणे भवेत्॥ 22 150
4. तत्र राजोपभोग तु व्याख्यघस्याम्यनुपूर्वशः॥ 22.151

परभावेङ्गिताभिज्ञः शूरो रक्षा – समन्वितः ॥
उहापोहविचारी च नानाशिल्पप्रयोजकः ।
नीतिशास्त्रार्थकुशलस्तथा चौवानुरागवान् ॥
धर्मज्ञोऽव्यसनी चैव गुणैरेतैर्भवेत्तृपः ॥

ना० शा० 24. 76–80

नृपस्यैतल्लक्षणं समाहृत्य धनञ्जयो नेतुर्लक्षणमाह —

नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः।
रक्तलोकः शुचिर्वाग्ग्मी रुढवंशः स्थिरो युवा॥
बुद्ध्युत्साह–स्मृति – प्रज्ञाकलामानसमत्वितः।
शूरा द्रढश्च तेजस्वी शास्त्रजक्षुश्च धार्मिकः॥ 2. 1–2

दशरुपक इत्थं विशेषितोऽयं नेता सामान्य - गुणलक्षितः कथमपि तत्रैव वर्णितान् धीरोद्धतनाकगुणान्न समन्वयतीति स्पष्टं प्रतीयते।

धनञ्जयस्योपर्युक्तसामान्यनेता तु वस्तुतो राजैव। नेतुरीदशं राजपरकमभिप्रायं न स्पष्टं प्रकटितवानिति त्रुटिरेव। रामचन्द्रगुणचन्द्रयोर्नाट्यदर्पणे नेतुर्नृपत्वमधोविधिना स्पष्टीकृतम् –

अथ राजशब्दं व्याख्यातुं सामान्येन नतुः स्वरुपमाह —

उद्धतोदात - ललित - शान्ता धीरविशेषणाः।
वर्ण्याः स्वभावाश्चत्वारः नेतृणां मध्यमोतमाः॥ 1.6

धनञ्जयोऽपि नेतू राजत्वमधोलिखितेन श्लोकांशेन व्यञ्जयति —

एवं नाट्ये विधातंव्यो नायकः सपरिच्छदः। 2.46

प्रसंगेऽस्मिन् परिच्छदस्तु नायिका-दूत-दूती-मन्त्रि-पुरोहितादयो राज्ञ एव कल्पनीयः।

HANSA MEHTA LIBRARY
The M.S. University of Baroda

नायकस्य सामान्य सामान्यगुणास्तु भवति नाम। तेषां परिगणनं भोजेनान्य-विधेनैव निदर्शितम्। तधथा - उतमादिहेतवश्च नायकानां सामान्य-गुणा जात्यादयश्चतुर्विंशतिः। यथा- जातिः, अन्वयः, अभिजनः, निवासः, आस्पदम्, पदं, पितरौ, प्रभावः, प्रतिज्ञा, शास्त्रज्ञानम्, अदीनवाक्यता, वाग्मित्वम्, देशकालावबोधः, इंगिताकारज्ञता, दाक्ष्यम्, कलावैदग्ध्यम्, चतुरता, रुपसम्पत्, सौभाग्यम्, त्यागः, सौहार्दम्, महारम्भता, शिक्तिः, शीर्य, मिति।

—भरतकोशः पृष्ठम् 327

इमे सामान्यगुणा साधारणतः सर्वविधानां रुपकाणां नायकेषु दश्यन्ते।

नायका भरतादिभिः पौनःपुन्येन सम्यग्वर्गीकृताः। प्रथमं तावत् प्रकृत्यनुसारेण नायका उतमाः, मध्यमाः, अधमाश्च भवन्तीति भरतेन प्रतिपादितमी।[1] तत्रोतममध्यमौ गुणन्वितौ, अधमश्च दोषपँर्णः स्युः।[2]

परतो भरतो नायक-प्रकारं नियमयन् प्राह [3]

अत्र चत्वार एव स्युर्नाकाः परिकीर्तिताः।
मध्यमोतमप्रकृतौ नानालक्षणताः॥
धीरोद्धता धीरललिता धीरोदातास्तथैव च।
धीरप्रशान्तकाश्चैव नायकाः परिकीर्तिताः॥

—ना० शा० 24. 16-17

न खल्वेतन्नियमनं व्यावहारे परिनिष्ठितम्। भाणप्रहासनयोनायका उतम-

1. ना० शा० 24. 1, 7
2. ना० शा० 24. 3, 7
3. नैतत्साधु। धीरोद्धतस्तु नास्ति मध्यम उतमो वा।

मध्मप्रकृतिका न सन्ति। भाणनायको धूर्त-विटस्तु 'अधम्:' भवति।[1] प्रहसनस्य नायकस्तु 'भगवतापसविप्रादयो' भवन्ति।[2] भगवताषयविप्रा यतिवान यतिवानप्रस्थ-गृहस्था:, आन्ये शाक्यादयस्तैरुपलक्षितम्। हास्य - प्रधानवचन -सम्बन्धशीलनादिना कुत्सितैः पुरुषैरतएव प्रहस्यमानैः सामार्थ्यातैरेव भगवदादिभि-र्युक्त म् ।[3] एतादशा भाणप्रहसन नायका भरतधन्यञ्जयादीनान्नायकचातुर्विध्ये न समायान्ति।[4] एततु नाट्य-शास्त्र अभाव: प्रनिभासते।

नाट्यदर्पणे रामचन्द्रौ धीरोदातादिभेदा नेतुः प्रकृतेरेव सन्तीति वर्णयत:। तथाहि –

उद्धतोदातललितशान्ता धीरविशेषणा:।
वर्ण्या: स्वभावाश्चत्वार: नेतृणां मध्यमोतमा: ।। 1.6

स्वाभावस्वभाविनोरभेदात् समानाभिकरणनिदेश:।
भारतीय नाट्यशास्त्रे धीरोदातादीनामुदाहरणानि सन्ति —

देवा धीरोद्धताज्ञेया: स्युधीरललिता नृपा:।
सेनापतिरमात्याश्च धीरोदातौ प्रकीर्तितौ ।।
धीरप्रशान्ता विज्ञेया बाह्मणा वणिजस्तथा ।। 24.4

इति न सर्वथा साधु। अभिनवगुप्तेनास्मिन्प्रकरणे व्याख्यातम्—इति वचन पर्यलोच्यमाने देवादीनां नाटकनायकत्वानुपपते:। धीरललित एक एव नायक इति। तदसत्। न हि जतकप्रभृतीनां रामादीनामपि वा धीरललितत्वम्। यदाह – "धीरोदातं जयति चरितं रामनाम्नश्च

---

1 शकारश्च विटश्चैव ये चान्येप्येवमादय:।
सङ्कीर्णास्तडपि विज्ञेया ह्यधमा नाटके बुधै: ।। 24 14
गुणचन्द्रानुसारेण भाण प्रहसनयो:, स्याचिद् वीथ्या च नीचोडपि नायक:। नाट्यदर्पणे 4 7।

2. भगवत्तपसविप्रैरन्यैरपि हास्यवाद्-सम्बद्धम्।
कापुरुषसम्प्रयुक्तं परिहासाभाषणप्रायम् ।। ना० शा० 18-103

3 ना० शा० 18-103 अधिकृत्य भारती।

4. भरतस्तु भाण-प्रहसनादीनामधमनायकान् न गणयति। अधोलिखीतकारिकाय नायकानां चातुर्विध्यनियमनमसाम्प्रतम -
अत्र चत्वार एव स्युनायिका: परिकीर्तिता:।
मध्यमोत्तमप्रकृतौ नाना लक्षण - लक्षिता : ।। 24.16

विष्णोः" इति। अभिनवगुप्तानुसारतस्तु पूर्वोक्त कारिकानुकानुसारेण धीरललितत्वं राज्ञ एव वर्णनीयं नान्यस्य, सेनाण्यमात्ययोर्धीरोदातत्मेव, देवानां धीरोद्धतत्वमेव, द्विजातीनां वीरप्रशान्तत्वमेव। 'अभिनवगुप्तस्य संशोधित-प्रपञ्चोऽपि न व्यावहारिक :'इति वेणीसंहारोतररामचरितादिषु स्पष्टं प्रतिभाति।

नायिका - विषये नायकस्य वर्तनं परीक्ष्य प्रणयिनो नेतुः पाञ्चविध्यं भरतन प्रतिपादितम् —

चतुरः, उत्तम, मध्यः, नीचः, प्रवृत्तकश्च।[1]

**चतुरः**

समदुःखक्लेशहः प्रणयकोधप्रसादने कुशलः।
योऽर्थो नात्मच्छन्दो दक्षश्चतुरः स बोधव्यः॥ 23.54

**उत्तमः**

मधुरस्त्यागी रागं न याति मदन्स्य चापि वशमेति।
अवमानितश्च नार्या विरज्यते चातमः स पुमान्॥

**मध्यमः**

सर्वार्थैमध्यस्थो भावग्रहणं करोति यो नार्याः।
किञ्चिदोषं दष्ट्वा विरज्यते मध्यमः स भवेत्॥

1 स्त्रीसम्प्रयोगविषये ज्ञेयाः पुरुषास्त्वमी पच।—ना० शा० 23 53

**नीचोऽधमः**

अभिनवकृते व्यलीके प्रत्यक्षं रज्यते दढतरं वः।
मित्रैर्निवार्यमाणो विज्ञेयः सोऽधमः पुरुषः॥

**प्रवृतकः**

अवगणितभयामर्षो मूर्खप्रकृतिः प्रसक्तहासश्च।
एकान्तदढग्राही निर्लज्जः कामतन्तेषु॥
रतिकलहसम्प्रहारेष्वकर्कशः क्रीडानायकः स्त्रीणाम्।
एवंविधस्तु तज्ज्ञैर्विज्ञेयः सम्प्रवृतस्तु॥ 23.62

एतेभ्यो व्यतिरिक्तं ज्येष्ठं नायकमप्यस्मिन् प्रसङ्गो भरतो विवृणोति। तद्यथा,

यो विप्रयं न कुरुते नार्याः किंचिद्विराग संज्ञातम्।
अज्ञातेप्सितहृदयः स्मृतिमान् धृतिमान् स तु ज्येष्ठः॥
ना० शा० 23. 55

इमे भारतीया नायकाः साधारणत एकनायिकाः सन्ति। न तीषा वैवध्यं प्रपंचयितुं धनञ्जयो मर्ति कुरुते। स तु पूर्व प्रत्यन्यया हृतं नायकमेव युवजन-प्रीतये सविशेषं महत्वपूर्ण मन्यते, तेषां भेदं च दक्षिणः, शठः, धृष्ट इति प्रस्तावयति। एतेषु धृष्टो वा तावत् भरतस्याधमेन समानः।[1]

अन्यत्र भरतः शठं परिभाषने —

वाचैव मधुरो यस्तु कर्मणा नोपपादकः।
योषितः किञ्चिदप्यर्थ स शठः परिभाष्यते॥ 22. 315

1 व्यक्ताङ्गवैकृतो धृष्टः। गूढविप्रियकृच्छठः। दश० 2. 7

धनञ्जयस्यानुकूलो दक्षिणश्च नायको भरतेन प्रियः, कान्तः, विनीतः, नाथः, स्वामी, जीवितम्, नन्दनः इत्यादिभिः नामभिः संकेतितः।[1] धनञ्जयस्य शठो धृष्टो वा भारतीयनाट्यानुसारेण नायिकया दुःशीलः, दुराचारः, शठः, वामः, विकत्थनः, निर्लज्जः, निष्ठुरश्चाभिधीयते।[2]

धनञ्जयस्तु दक्षिणः, शठः, धृष्टः, इति प्रकारत्रयमेव संक्षेपण वर्णयति। भरतस्तावत् प्रत्येकस्य भीदानपि सूक्ष्मेक्षिकया सरसं विवृणोति। भरतानुसारेण दक्षिणादयो नायका अधोविधाः सन्ति —

**दक्षिणः**

कुलीनो धृतिगान् दक्षो दक्षिणो वाग्विशरदः। 22. 310

**शठः**

वाचैव मथुरो यस्तु कर्मणा नोपपादकः।
योषितः किञ्चिदप्यर्थं स शठः परिभाष्यते ॥ 22. 315

**निर्लज्जः**

भरतस्य निर्लज्ज एव धनञ्जयस्य धृष्टः। तद्यथा

वार्यमाणो दढतरं यो नारीमुपसंपति।
सचिह्नः सापराधश्च स निर्लज्झ प्र्त स्मृतः ॥ 22. 318

1. ना० शा० 22. 305-311
२. ना० शा० 22. 312-316

प्रिय:

भरतस्य प्रिय एव धनञ्जयस्यानुकूलनायक:। तद्यथा

यो विप्रियं न चायुक्तं प्रभाषते।
तथार्जवासमाचार: स प्रियस्त्वभिधीयते॥ 22. 305

## पताका - नायक:

भारतीये नाट्यशास्त्रे केवलं नायकस्यैव चर्चा स्पष्टं विद्यते। पताका - नायको वोपनायको वानुनायको वा तत्र न संज्ञित:। अभिनवगुप्तस्तावत् प्रधान - नायकेन सह पताकानायक - प्रकरीनायकयोराधिकारिकवस्तु - प्रयोगे स्थानं निर्दिशति।[1] भरतानुसारतस्तु प्राज्ञौ इति विशिष्टौ भवत:।[2] अपरञ्च पताका - वृतस्यनायक एव पताकानायक:। सुग्रीव - विभीषणौ सुसिद्धौ पताकानायकौ।

धनञ्जयानुसारेण पताकानायक: पीठमर्दो भवति। पीठमर्दस्तावत् पारिभाषिकं पदम्। न तत्र पीठं न च मर्दनं व्युत्पन्नम्। पोठमर्दस्तु नायकस्यानुचर:, भक्त:, गुणै: प्रधाननायकात् किञ्चिदूनो विचक्षण: स्यादिति धनञ्जयो दशरुपके निर्दिशति।[3]

शारदातनयानुसारेण पताकानायक: एवोपनायको भवति। शारदातनय: पीठमर्द इति पदं व्यत्पन्नं मन्यते। तद्यथा,

पीठमर्दध्यास्य पुरत: प्रयोक्ता नायिकादिषु।
स पीठमर्दा दिश्वास्य: कुपितस्त्री-प्रसादक:॥

1 प्रज्ञै: प्रधाननायक पताकानायक-प्रकारीनायकैश्चेतनरुपै:।
2 यदाधिकारिक वस्तु सम्यक् प्राज्ञै: प्रयुज्यते। ना० शा० 19 26
अत्र प्राज्ञा: पताकानायकादय: सन्तीति मतमभिनवगुप्तस्य।
3 दश० 2 8

पीठमर्दस्तन्मतेन विदुषको भवति।[1] न हि खलु सुग्रीवादयः पताका-नायकाः पीठमर्दाः। पीठमर्दास्तु नायिकाप्राप्तौ एव नायकस्य सहायाः। नतन्निर्दिष्टं धनञ्जयेन। स तु पताकातनायकं पीठमर्द च पर्यायं मन्यते इति चिन्त्यम्।

## प्रतिनायकः

प्रतिनायकोऽपि भरतेन न सम्यक् लक्षितः। अभिनवगुप्तस्तावत् प्रतिनायकं विशिष्टमेव मनुते।[2] प्रतिनायकस्य स्थितिः संस्कृत-नाट्य+शास्त्रीयेषु सन्दर्भेषु सुविचारिता नास्त्येव। धनञ्जयानुसारेण तु—

लुब्धो धीरोद्धतः स्तब्धः पापकृद् व्यासनी रिपुः॥ 2.9

न खलु बहवः सन्ति प्रतिनायकस्य समीक्षका नाट्याचार्याः । रामचन्द्रगुणचन्द्रावपि धनञ्जयमेवानुहरतः। वयं तु रुद्रटस्य मतेन प्रतिनायकं वर्णयामः। स तु गुणी अभिजातश्च स्यात्। संस्कृतरुपकेषु प्रतिनायकानां स्थितिर्वैकल्पिकी वर्तते। साधारणतः प्रतिनायका लुब्धाः, धीरोद्धताः, स्तब्धाः पापकृतः व्यनिनश्चापवादा एव सन्ति।

## नायकस्य सहायाः

### विदूषकः

प्रणयात्मकेषु रुपकेषु नायकस्य प्रथमः सहायको विदूषक एव वर्तते। स विदूषको न केवलं राज्ञामेव हासकारकोऽपि तु देवानामपि। तद्यथा भरती वर्णयति –

लिंगी द्विजो राजजीवी शिष्यश्चेति यथाक्रमम्।
देवक्षितिभृतामात्यब्राह्मणानां प्रयोजयेत्॥ 24.20

1 भावप्रकाशने पृष्ठ 84
2 सा (निरुढिः) च नायकस्यामात्यस्य नायिकायाः प्रतिनायकस्य दैवस्य वा। ना० शा० 18 8 अधिकृत्य भरती।

अभिनवगुप्तानुसारेण देवानां विदूषक लिङ्गी ऋषिर्भवति। राज्ञां विदुषकः कश्चिद् ब्राह्मणो नियुज्यते। अमात्यस्य विदूषको राजजीवी भवति। ब्रह्मणानां विदूषकः शिष्य एव नियोजनीयः। विशेषतो राज्ञा विदूषकस्य प्रमुखं स्थानमासीत् रुपकेषु। तद्यथा,

विप्रलम्भसुहृदोऽसी संकथालाप-पशलाः॥ ना० शा० 24 . 21

भरतो विदूषकस्य विशेषं वर्णयति —

प्रत्युत्पन्नप्रतिभो नर्मकृतो नर्मगर्भे निर्भेदः।
छेकविदूषितवचनो विदूषको नाम विज्ञेयः॥ 35.25

विदूषकस्तु कुरुपो वानररुपो वासीदिति रुपकेषु प्रयशो वर्णिताम्।

अप्रणयात्मकेषु नाटकुषु क्वचिद् विदुषकस्य स्थानं नासीत्। उतररामचरिते, वेणीसंहारे, मुद्राराक्षसे च विदूषकाभावः प्रमाणयति यत् गम्भीरार्थचिन्तनस्य वैदुष्यपूर्णप्रकृतौ विदूषकस्य हास्यदिकमवांछितमिति सुराम्मतम्। रामकाव्यात्मक-नाटकेषु विदूषकोऽतिपवाद एव।
विदूषकस्य विवरणं दशरुपकेऽतित्यूतमेव वर्तते।

हास्यकृच्च विदूषकः। 2. 8

## विटः

विटस्तु नाट्यशास्त्रीयो वैशिक एव। भरतः शकारं विटं चाधमं निर्दिशति। भरतानुसारेण वेश एव वेश्या। वेश्यापचारे साधुः वैशिकः।[1] भरतस्तस्य त्रयस्त्रिंशद् गुणान् निबोधयति। तद्यथा,

1. वेशोपचारे साधुर्वा वैशिकः पचरकीर्तितः। ना० शा० 23. 1

शास्त्रविच्छिल्प - सम्पन्नो, रुपवान्, प्रियदर्शनः, विक्रन्तः, धृतिमान्, वयोवेषकुलान्वितः, सुरभिः, मधूरः, त्यागी, सहिष्णुः, अविकत्थनः, अशङ्कितः, प्रियभाषी, चतुरः, शुभदः, कामोपचारकुशलः, दक्षिणः, देशकालवित्, अदीनवाक्यः, स्मितवान्, वाग्मी, दक्षः, प्रियंवदः, स्त्रीलुब्धः, संविभागी, श्रदधानः, दढस्मृतिः, गम्यासु, चाप्यविस्त्रम्भी, मानी च।[1]

वेशोपचारकुशलो मधुरो दक्षिणः कविः।

उहापोहक्षमो वाग्मी चतुरश्च विटो मतः।
विटश्च कासाचिव्यकरणे चोपयुज्यते।
माल्यभूषोज्ज्वलः कुप्यत्यनिमितं प्रसीदति।

विटः प्राकृतवादी च प्रायो बहुविकारवान्॥[2]

वैशिकस्य विड्टस्य वा पूर्णपरिचयश्चतुर्भाणीनामकेनोरुपक - चतुष्टयेन प्रतिफलति। तत्र नायका अनायका वा विटा वेश्योपचारे संम्यक् प्रवर्तन्ते। ते तत्र राजकुमाराः, ब्राह्मण-युवकाः, वणिजः, शूद्रा वा सर्वे वेश्यानिरता एव स्वजीवनं सफलयन्ति। वृद्धोऽपि विटो स्वानुभावेन प्रविणः, सन् कामुकान् वेश्याश्च परामर्शैर्बोधयति ।

भाणनातके रुपके वैशिको वा विटो वानुतमोऽपि वेशोपचार-कर्मणि न विशेषमहत्वपूर्ण स्थानं भजतते, यथा मृच्छकटिकाविषु प्रकरणेषु । अस्मिन् प्रकारणे स शकारस्य मित्रमेव तस्य कामुकतां सम्पूरयति।

ईदशो महत्वपूर्णो विटो धनञ्जयेनातिसंपेण वर्णितः —

एका विधों विटश्चान्यः।

1. ना० शा० 23 2-7
2. भावप्रकाशने पृष्ठ 84. 267, 288

धनञ्जयस्तु प्रणयात्मकें षु रुपकेषूपर्यक्त -पीठमदादीनां योगं वर्णयति। स एतादशेषु रुपकेषु मन्त्रिणां मत्वपूर्ण भूमिकां विस्मरति। ततु स्वप्नवासवदत-रत्नावल्योर्यौगन्धरायणस्य योगदानेन प्रमाणितमीव। धनञ्जयो मन्त्रिणां साह्यं कार्यान्तरेषु वर्णयति। कार्यान्तरेषु वर्णयति। कार्यान्तराणि तु अन्तःपुरद्बाह्यानि सन्ति।

भरतानुसारेण (युव) राजः, सेनापतिः, पुरोधाः, मन्त्री, सचिवः, प्राड्विवाकः, कुमाराधिकृतश्च नायकस्य सहायाः सन्ति। अन्येऽपि तत्र सहाया भवेयुरिति भरत आह –

एते चात्ये च बहवो मान्या ज्ञेया नृपस्य तु । 24.75

भरतनिर्दिष्ट - सहायेषु युवराजः, सेनापतिः, सचिवः, प्रड्विवाकः, कुमाराधिकृतश्च धनञ्जयेन न संगृहीताः। अस्मिन् प्रसङ्गे नायकस्य सहायो राजा भचेदिति भरतः स्पष्टयति।[1] कथं नाम राजा स्वयमेव स्वकीयः सहायः स्यादिति सन्देहे समुत्पन्नेभिनवगुप्तो व्याख्याति - युवराजोऽत्र राजशब्देतोक्तः। अत्र धनञ्जस्याधोलिखित - कारिकाभिनवगुप्तं नानुसरन्ती सशयमेव जनयति।

मन्त्री स्वं वोभयं वापि सखा तस्यार्थ चिन्तते। दश० 2. 42

कथं कश्चिद् राजा नायकः स्वयमीव स्वकीयः सहायः स्यादिति भ्रमोऽभिनवगुप्तस्य व्याख्यया दूरकरणीया। अतएव धनञ्जस्य कारिका चिन्त्यैव।

धनञ्जयेन तपस्वी, ब्रह्मवादि, सुहृत्, कुमारः, आटविकः, सामन्तः, सैनिकः, वर्षवरः, किरातः, मूकः, वामनः, म्लेच्छः, आभीरः, शकारः, इति बहुजना नायकोपकारकाः, परिगणिताः।[2]

सर्वे ते नायकस्य सहाया गुणानुसारं ज्येष्ठाः, मध्यमाः, अधमाश्च भवन्ति।

---

1 राजा सेनापतिश्चैव पुरां धा मन्त्रिणस्तथा।
सचिवाः प्राड्विवाकाश्च कुमाराधिकृतास्तथा ।।

2. दशरुपके 2. 43 - 44

# नायकगुणा

नायकस्य मानसिकवृतिमधिकृत्य तस्याष्ट गुणा निर्धारिता: सन्ति। इमे तु सात्विकगुणा इति सत्वादेव तेषां प्रदुर्भावं व्यनक्ति । सत्वं नाम चितवृतिरेव। नायकस्येमे सात्विकगुणा: पात्रेण सात्विकाभिनयद्वारा प्रक्षकान् प्रति प्रकटीक्रियन्ते।[1] सात्विकाभिनयस्तु चतुर्षु अभिनयेषु रसाभावापेक्षया प्राथम्यं भजते। अतएव सात्विकगुणा बहुमता: सन्ति।

अष्टगुणेषु शोभा, माधुर्यम्, स्थैर्यम्, गाम्भीर्यम्, औदार्यम् तीजश्च षडीव नायकस्य कार्येभ्य: प्रक्षकाणां बोधगम्यानि भवन्ति। शीषं द्वयं विलासो ललितञ्च प्रत्यक्षमीव प्रतिफलत:।

## *शोभा* –

भरतानुसारेण नायकस्य दाक्ष्यं, शौर्यम्, उत्साही, हीनविषयेषु घृणा, उत्तमगुणोभ्यो रुचिश्च शोभाया उद्भाव: ।[2] धनञ्जय एतेषामुत्साहं न गणयति इति[3] तस्य त्रुटिरेव, यतो हि नाम इमे पौरुषा गुणा: सन्ति। पौरुषगुणेषु वीररसोचितोत्साहस्तु वर्णनीय एव।

## *विलास:* –

भरतानुसारेण विलासे नायकस्य गतिर्वृषभवत् महिमशालिनी भवति द्रष्टिश्च शनै: सञ्जचरति। तदर्थं सल्लपनमीषद्हासपूर्वकं जायते। धनञ्जयस्तत्त्वतो भारतीयं लक्षणमनुहरित।

## माधुर्यम् –

कथंनाम नाधुर्यं नायकेन समिध्यत इति वर्णयन् भरत: करणानाम् (इन्द्रियाणाम्) युद्ध -

---

1. चतुर्विधोऽभिनयो भवति — सात्विक:, वाचिक:, आङ्गिक:, आहार्यश्चेति। तत्र सात्त्विकाभिनयो प्रकृते: चित्तवृत्ते:, वाचिकाभिनये वाण्या:, आङ्गिकाभिनय शारीरिककारणाम्, आहार्याभिनये च तस्या: वस्त्रपरिधानादीनामनुकरणं पात्रै: प्रस्तूयते।
2. दाक्ष्य शार्यमथोत्साहो नशचार्थेषु जुगुप्सनम्।
   उत्तमैश्च गुणै: स्पर्धा यत: शोभेति सा स्मृता ॥ ना० शा० 22.34
3 नीचे घृणाधिके स्पर्धा शोभाया शौर्यदक्षते। 3 1।

नियुद्ध - व्यायामादिष्वभ्यासमावश्यकं मनुते।[1] यस्यां स्थितौ साधकरणजनानां महान् विकारो जायेत, तस्यामपि माधुर्यगुणोपेतस्य नायकस्य विकारो मधुर एव स्यात्। धनञ्जयो भरतं तत्वतोऽनुहरति।

## स्थैर्य —

भरतानुसारेण धर्मकामविषयकेभ्यः सकल्पेभ्यः सताग्रहो हि स्थैर्य नाम गुणः। नायको विघ्नोपहतोऽपि वैषम्यात् न भवति। धनञ्जयो भरतं संक्षेपेणानुहरति।

## गाम्भीर्यम् —

भरतानुसारेणः

यस्य प्रभावादाकारा हर्षक्रोधभयादिषु।
भावेषु नोपलक्ष्यन्त तद्गाम्भीर्यमितिस्मृतम्॥ 22.38

अस्मिन् प्रसङ्गेऽभिनवगुप्त आकारं व्याख्याति —

आक्रियते चित्तवृत्तिरेभिरित्याकारः मुखरागदष्टिविकारादयः। गाम्भर्ये सति आकारा न प्रकटीभवन्ति। एतदीव लक्षणं धनञ्जयः संक्षिप्त ब्रूती —

गाम्भीर्य यत्प्रभावेण विकारो नोपलक्षयते। 2. 12

यदा विकार ईषदुपलक्ष्यते तदा माधर्यं भवतीति द्वयोरन्तरमिति धनिकः।

1. ना० शा० 22. 36 अधिकृत्य भारती।

## तेजः –

भरतानुसारेण शत्रु प्रयुक्तधिक्षेपावनादेरसहनं तीजो भवति। तत्र नायको प्राणसंशयेऽपि अवमानादेः प्रतिक्रियाया विरतो न भवति। अन्यासु स्थितिषु - नीत्यनुवर्तने, दशकालानुवर्तने चावमानसहनं न सापवादं भवतीति प्राणात्ययेऽपीति पदयोरौचित्यम्। परेणेति पदेन भरतस्य विज्ञापनीयं वर्तते यत् मिश्रेण गुरुणा वा कृतमवमानं सहत एव नायकः। नैतत्तेजोविरोधि।

धनञ्जयो भरतमेव सक्षिप्तमनुहरति।

## ललितम् –

भरतानुसारेण

अबुद्धिपूर्वकं यतु निर्विकारस्वभवजन्।
श्रृङ्गाराकाचेष्टवं ललितं तदुदाहृतम्॥ 22.38

यत्र विकाररहितं स्वभावत एव श्रृंङ्गाराकारचेष्टाः सन्ति, तत्र ललितं नाम सात्विकगुणो भवति।
भरतमेव धनञ्जयोऽनुहरति।

## औदार्यम् –

औदार्य तु नाम्नैव प्रतीतम्। धनञ्जयानुसारेण तु जीवनदानं पराकाष्ठा औदार्यस्य भवति। न केवलं दानमपितु अभ्युपपतिः (परित्राणायार्थिनो ग्रहणम्)प्रियभाषणम् च शत्रुणामपि विषये विलसत इति महिमौदार्यस्य। धनञ्जयानुसारेण सज्जनानामात्मसात्करणम् व्यौदार्यस्य लक्षणम्।

(1) प्रकृतिभेदन 1. उत्तम 2. मध्यम. 3. अधम. ।

(2) गुणभेदन 1. सात्विक· 2. राजस 3. लामस. ।

(3) प्रवृतिभेदन 1. अनुकूलः 2. दक्षिण· 3. शढः 4. धृष्टाः ।

(4) परिग्रहभेदन 1. असाधारणः (रामचन्द्र.) 2. साधारणः (वत्सराज उदयन·)

धीरोदाताः - अष्टौ (8)

धीरोध्यता· - चातुश्चत्वारिंशत् (44)

धीर शन्ताः - अष्टौ (8)

अदित्य चतुरुतरशत प्रकाशः (104) भवन्ति ।

सांस्कृत काव्यशास्त्रे रसनिरुपणे आलम्बन विभावन्वेन नायकस्य महत्वपूर्णम् स्थानम् वर्तते। काव्ये नाटये च रसनिरुपण प्रक्रियायाम आलम्बनौद्धीपन विभावयोः महत्वपूर्णम् स्थानम् वर्तते आलम्बनंइत्युकत्ते नायक नायिकयोः निरुपण्। उक्तम् च रसमंजरीकारेण शृगारस्य उभय निरुपतिकत्वात् नायकोअपि निरुपते नायकस्य सहायेकत्वेन पति· उपपतिः वैशिकश्चइति भेदत्रम्। तत्र विधिवत पाणिग्राहाकात-पतिः। शास्त्रप्रमाणेन यस्य विवाहा संस्कारा निष्पन्नौ भवति। सहपति शृंगारस्य उभयनिरुपत्यात्वात नायिकयानायकस्य च अन्योअन्यम् विषयरुपतत्वात् आश्रयकारे निरुपणम् भवति। सर्वप्रथम नायक अनुकूल दक्षिण धृष्ट शठ भेदात्त चर्तुविधा भवति। तत्र सर्वकालिक परांगनो परागमुख्यत्वेसति सर्वकालम् अनुरक्तो अनुकुल नायकस्य उदाहरणम् यथा।

पृथ्वि त्वं भव कोमला विनमणे त्वं शैत्यमङ्गीकुरु
त्वं वर्त्मन लधुतां प्रयाहि पवन त्वं स्वेदमुत्सारय।
सान्निध्यं श्रय दण्डकावन गिरे निर्गच्छ मार्गादबहि-
र्वैदेही विपिनं मया सह यतो निर्गन्तुमुत्कणुते ॥ 101 ॥[1]

1 रसमजरी श्लोक क्रमाक - 101 पृष्ठ क्रमाक - 213

दक्षिणनायक. सकलनायिकाविषयसहजानुरागो दक्षिण । यथा --

एतत्पुर· स्फरति पदादुशां सहस्त्र -
मक्षिद्वयं कथय कुत्र निवेरायामि।
इत्याकलप्य नयनाम्बुरुहे निमील्य
रोमाश्चितेन वपुषा स्थितमच्युतेन ॥ 102 ॥[1]

अनुकुलदक्षिण

धृष्टः नायकस्य धृष्टताकामाय अनेकविध तर्जनेनअपि नायिकासाथ एव भवति। सहधृष्टा उदाहरेणम् यथा -

बध्दौ हारै करकमलयो द्वरितो दत्तदृष्टि
स्वापं ज्ञात्वा पुनरुपगतो दूरतो दत्तदृष्टि.।
तल्पोपान्ते कनकवलयं मुक्तमन्वेषन्त्या
दृष्टो धृष्ट· पुनरपि मया पार्श्व एव प्रसुप्तः ॥ 103 ॥[2]

कामिनीविषयककपटपटु· शठः। शठ· सर्वत्र मिथ्या वदति उक्तं च विज्ञानेश्वरादिलक्षितस्यात्रोलक्ष्य- त्वात्।

वाचैव मधुरो यस्तुकर्मणा नोपपादयेत्।
योषितां किंचिदप्यर्थ स शठ· परिकीर्तित· ॥

धृष्ट दर्शित बहि· अनुरागो विप्रियम् अन्यत्र गुढम् आचरति इति साहित्यदर्पणकर मतम् ।

धृष्ट नायकः भूयः कृत निपूशंक दोषोअपि भूयोनिवारीतोपि भूयाः परस्पर परायणा

1 रसमंजरी श्लोक क्रमाक - 102 पृष्ठ क्रमाक - 214
2. रसमंजरी श्लोक क्रमांक - 103 पृष्ठ क्रमांक - 216

धृष्टा: उक्तम् च कृतागाअपि नियशंका: तोडितोअपि नलज्जिता: धृष्ट दोषोअपि मिथ्यावाक कथितो धृष्ट नायका नायकामात्र पिदित विप्रयकारी शठा उभयत्र तुल्यानुरागो दक्षिण एकमात्र अनुरकत: तो अनुकूल उभयत्र अनुराग वैषम्यैतु शठ: एवम् पति उपपति वैषिकस्यैयते नायकस्य भेदत्र्यम् तत्र पतिरुपपति: यथा: ।

शङ्काश्रृङखलितेन यत्र नयनप्रान्तेन न प्रेक्षते
केयूरध्वनिभूरिभीतिचकितं नो यत्र चाश्लिष्यते।
नो वा पत्र शनैरलग्नदशनं विम्बाधर: पीयते
नो वा पत्र पिधीयते च मणितं तत्किं रतं कामिनो: ।। 105 ।।[1]

उपपतिरपि चतृर्ध्दा भवति। वहलवेश्योपभोगरसिको वैशिक: । उदाहरणम् यथा --

काञ्चीकलक्वणितकोमलनाभिकान्तिं
पारावतध्वनितचितकण्ठपालिम् ।
उद्भ्रान्तलोचनचकोरमनङ्गरङ्ग -
माशास्महे कमपि वारविलासवत्था: ।। 106 ।।[2]

वैशिकस्तूत्तममध्यमाधमभेदात् त्रिविध: भवति। दचितया: भूय: प्रकोपेडप्युपचारपरायण उत्म: । उदाहयणम् यथा -

क्षु:प्रान्तमुदीक्ष्य पक्ष्मलदृश: शाणारविन्दश्रियं
नोच्चैजल्पति न स्थितं वितनुते गृह्णाति वीटीं न वा।
तल्पोपान्तमुपेत्य किन्तु पुलकभ्राजत्कपोल धुति:
कान्त: केवलमानतेन शिरसा मुक्तास्त्रजं गुम्फति ।। 107 ।।[3]

1 रसमजरी श्लोक क्रमांक - 105 पृष्ठ क्रमांक - 218
2. रसमजरी श्लोक क्रमाक - 106 पृष्ठ क्रमाक - 221
3. रसमजरी श्लोक क्रमाक - 107 पृष्ठ क्रमाक - 223

प्रियाया: प्रकोपे य: प्रकोपमनुरागं वा न प्रकटथति चेष्टया मनोभावं गृह्णाति स मध्यम: । उदाहरणम् यथा -

आस्यं यद्यपि हास्यवर्जितमिदं लास्येन हीनं वयो
नेत्रं शोणसरोजकान्ति तदपि क्वापिं क्षणं स्थीयताम् ।
मालाया: करणोद्यमो मकरिकारम्भ: कृचाभोगयो -
र्धूय: कुन्तलधोरणीषु सुदृश: सायन्तनो दृश्यते ।। 108 ।।[1]

भयकृपालज्जाशून्य: कामक्रीडायामकृतकृत्यार्विचारोडधम: । उदाहरणम् यथा -

उदयंति हृदि यस्य नैव लज्जा
न च करुणा न च कोडपि भीतिलेश: ।
वकुलमुकुलकोशकोमलाभां
पुनरपि तस्य करे न पातयथा: ।। 109 ।।[2]

मानी चतुरश्य शठ एवान्तर्भवति । मानी यथा -

बाह्याकूतपराङ्मणं तव वचो वज्रोपमेयं मन:
श्रुत्वा वाचमिमामपास्य विनयं व्याजाब्दहि: प्रस्यिते ।
प्रातर्वीतविलोकने परिहृत्तालापे विवृत्तानने
प्राणेशे निपतन्ति हन्त कृपणा वामभ्रुवो दृष्टय: ।। 110 ।।[3]

चतुरस्य

तमोजटाले हरिदन्तराले काले निशायास्तव निर्गताया: ।
तटे नदीनां निकटे वनीनां धटेत शातोदरि क: सहाय: ।। 111 ।।[4]

---

| | | |
|---|---|---|
| 1 रसमजरी | श्लोक क्रमाक - 108 | पृष्ठ क्रमांक - 224 |
| 2 रसमजरी | श्लोक क्रमाक - 109 | पृष्ठ क्रमांक - 225 |
| 3. रसमजरी | श्लोक क्रमाक - 110 | पृष्ठ क्रमाक - 227 |
| 4 रसमंजरी | श्लोक क्रमांक - 111 | पृष्ठ क्रमाक - 228 |

चेष्टाव्य ह्ग्यसमागमो चतुरा:अपि द्विप्रकोरेण भवति

समागम चतुरा: चेष्टाव्यङ्ग्यसमागमो चतुरा: ।

कान्ते कनकजम्वीरं करे किमपि कुर्वति

आगारलिखिते भानौ विन्दुमिन्दुमुरवी यदौ ॥ 112 ॥[1]

रसमंजरी कारमते पति: प्रोषित: पतिरुपपतिर्वैशिकश्च भवति। तत्र प्रोषितपति: ।

उरु रम्भा दृगपि कमलं शैवलं केसपाशो

वक्त्रं चन्द्रो लपितममृतं मध्यदेशो मृणालम् ।

नाभि: कूपो वलिरपि सरित् पल्लव: किन्तु पाणि -

र्यस्या: सा चेदुरसि न कथं हन्त तापस्य शान्ति: ॥ 113 ॥[2]

प्रोषितरुपपति

यान्त्या सर: सलिलकेलिकुतूहलाय

व्याजादुपेत्य मपि वर्त्मनि वर्तमाने ।

अन्तस्मितद्युतिचमत्कृतदृक्तरङ्गै

स्ङ्गकृतं किमपि वामदृश: स्मरामी ॥ 114 ॥[3]

वैशिका:

अधृतपरिपन्निचोलबन्धं

मुषितनकारमवक्र दृष्टिपाते ।

प्रकटहसितमुन्नतास्यबिम्बं

पुरसुदृश: स्मरचेष्टितं स्मरामि ॥ 115 ॥[4]

अनभिज्ञो नायको नायकाभस एव । अनभिज्ञनायको इत्युक्ते कामिनीहृदयाभिप्रायज्ञानशून्य इत्यर्थ: । नायक वदाभासते नायकभास: रसमंञ्जरीकार मत

1. रसमजरी श्लोक क्रमाक - 112 पृष्ठ क्रमाक - 229
2. रसमंजरी श्लोक क्रमांक - 113 पृष्ठ क्रमाक - 230
3. रसमजरी श्लोक क्रमाक - 114 पृष्ठ क्रमाक - 231
4 रसमजरी श्लोक क्रमाक - 115 पृष्ठ क्रमाक - 231

नायिकाया इव नायकस्यापि भेदाः न संभवति । नायिकाया अवस्था भेदेन भेदाः भवन्ति । नायकस्य स्वभाव भेदेन इति विशेषात् अनुकुलत्वम्दक्षिणत्वम् धृष्टत्वम् शठत्वम् इति चत्वारा एव नायकस्य भेदाः स्वभावादि इति अन्यस्य अवस्था भेदेन अपि नायकस्य भेदाः स्यात उक्त विप्रलब्ध खंडितादयो अपि भेदाः स्वीकर्तव्या स्युः तथा च संकेत व्यवस्थायाम् स्त्रीणाम् गमेन आगमने च असंप्रदायात् समागम शंका धूरतत्वमवा अन्य संभोग चिन्नितत्वम् वा नायकानाम् न तु नायिकानाम् ताः अपि ष्तउदभावने रसभाषा प्रत्येरिति एवम आवान्तरभेदेन नम्रसचिवाः पिठमर्द बिट, चेट, विदुषक भेदात्त चर्तुदा भवन्ति तत्र कुपितस्त्रीप्रसदिकः पीठमर्द । यथा -

कोऽयं कोपविधिः प्रयच्छ करुजागर्भ वचो जायतां
पियूषद्रवदीर्घिकापरिमलैशमोधिनी मेदिनी ।
आस्तां वा स्पृहयालु लोचनमिदं व्यावर्तयन्ती मुहु-
र्यस्मै कुप्यसि तस्य सुन्दरि तपोवृन्दानि वन्दामहे ॥ 117 ॥[1]

उकतम् च विद्यानाथेन अपि

" एषां नायिकानुकूलने पीठमर्दविटचेटविदूषकाः सहायाः ।
किंचिदूनः पीठमर्दः एकविद्यो विट स्मृत : ।
सन्धानचतुरश्चेटो हास्यप्रायो विदुषक ॥ "

दर्पणकरिण तो एवम् प्रोकतम्

" दूरानुवर्तिनि स्यात्तस्य प्रासङ्गिके निकृते तु
किंचित्तद्गुणहीनः सहाय एवास्य पीठमर्दाराय: ॥ "

यथा रामादीनां सुग्रीवादयः ।

1. रसमजरी श्लोक क्रमाक - 117 पृष्ठ क्रमाक - 235

" शृङ्गारेऽस्य सहाया विटचेट विदुषकाद्याः स्युः ।
भक्ता नर्मसु निपुणः कुपितवधूमानभञ्जनाः शुध्द्वाः ॥ "

आदिना मालाकाररजकताम्बूलकगान्धिकादय : ।

" सम्भोगहीनसम्प्द् यिहस्तु धूर्तः कलैकदेशज्ञः ।
वेशोपचारकुशलो वाग्मी मधुरोऽथ बहुमतो गोष्ठ्याम ॥ "

कामतन्त्रकलाकोविदो विटः । उदाहरणम् यथा -

आयताः कुमुदेश्वरो विजयते सर्वेश्वरो मारुतो
भृङ्गः स्फुर्जति भैरवो न निकटं प्राणेश्वरो मुञ्चति ।
एते सिध्द्वरसाः प्रसूनविशिखो वैद्योऽप्यवन्ध्योद्यमो
मानव्याधिरसौ कृशोदरि कथं त्वच्छ्चेतसि स्थास्यति ॥ 118 ॥[1]

सन्धाने चतुरश्चेटकः । यथा -

सा चन्द्रसुन्दरमुखी स च नन्दसूनु -
र्दैं वान्निकुञ्जभवनं समुपाजगाम् ।
अत्रान्तरे सहचरस्तरणौ कठोरे
पानीयापानकपटेन सरः प्रतस्थे ॥ 119 ॥[2]

अङ्गादिवैकृत्येन हास्यकारी विदुषकः । उदाहरणम् यथा -

आनीय नीरजमुखीं शयनोपकण्ठ
मुत्कण्ठितोऽस्मि कुचकञ्चुकमोचनाय ।

1. रसमजरी श्लोक क्रमाक - 118 पृष्ठ क्रमांक - 237
2. रसमजरी श्लोक क्रमांक - 119 पृष्ठ क्रमाक - 238

अत्रान्तरे मुहुरकारि विदुषकेण
प्रातस्तनस्तरुणकुक्कुटकण्ठनादः ॥ 120 ॥[1]

नाटयदर्पणकारेण अमुख्यो नायकः किञ्चिदूनवृत्तडग्रयनायकात् । तन्मते 'अमुरव्यत्वं' इति प्रधानफलोपेक्षयाडवान्तरफभाजनत्वात् । 'नायकत्वं' बहुतरकृतव्यापकत्वात् मुरव्यनेतृसहायभूतत्वाच्च। च लोभी, धीरोध्दृतः पापी, व्यसनी प्रतिनायकः ॥ (13 ) 166 ॥[2]

नाटयदर्पणकार मते मुरव्यनायकस्य प्रतिपन्थी नायकं ' प्रतिनायक :' । यथा राम - युधिष्ठिरयो, रावण - दुर्योधनो इति ॥

नाटयदर्पणकार मते मुरव्यनायकस्य प्रतिपन्थी नायकं ' प्रतिनायक :' । यथा राम - युधिष्ठिरयो , रावण - दुर्योधनो इति ॥

नीच विर्देषक - क्लीब - शकार - विट - किङ्करा : ।
हास्यायाद्यो नृपे श्यालः शकारस्त्वेकविद् विटः ॥ (14) 167 ॥[3]

अत्र : ' क्लबो ' नपुंसकः । एषां नीचत्वं नैसर्गिकम् । स्वामिचिानुरोधादौपादिकं तु मध्यमन्वमपि । तत्राद्यो विदूषको हासयनिमित्तं भवति । हास्यं चास्य अंग - नेपथ्य - वचो - विकारात् त्रेधा । तत्रां गहासयं खलति - खञ्ज - दन्तुर - विकृ - ताननत्वादिना । नेपथ्यहाम्यमत्यायताम्बरत्वोल्लोकित - विलोकितगामनादिना । वचोहास्य मसम्बध्द्वानर्थकाश्लीलभाषणादिना भवति । ' नृपे ' नृपस्य सम्बन्धी ' श्यालः ' पत्नीभ्राता ।नीचत्वादेव चाथ हीनजजातिः । ' हास्याय ' इति अत्रापि सम्बन्धान्न सर्वे राजपुत्रा दिर्नपश्यालः शकारः किस्तर्हि विकृ तहास्यहेतुः परिचारक एव । एकं राजपयोगी किंश्चद् गीतायिषु मध्ये वीत्ति इति एकविद् विटो ज्ञेय इति ॥ (14) 167 ॥

---

1 रसमंजरी श्लोक क्रमांक - 120 पृष्ठ क्रमाक - 238
2. नाटयदर्पणम् चतुर्थो विचेक : श्लोक क्रमाक - (13) 166 पृष्ठ क्रमांक - 375
3. नाटयदर्पणम् चतुर्थो विचेक : श्लोक क्रमाक - (14) 167 पृष्ठ क्रमांक - 376

अथ धीरोध्दृतादीना थथौचित्यं वियोगिनाम् ।
लिंगी द्विजो राजीवी शिष्यश्चैते विदुषकाः ॥ (15) 168 ॥[1]

'स्निग्धाः' सुहृदः । 'आदि' शब्दाद् धीरोदातधीरप्रशान्ता गृहयन्ते । एषां 'वियोगिनां' विप्ररम्भश्रृङ्गा खतां औचित्यानतिक्रमेण लिग्योदयो यथासंभवं सन्धिं विग्रहेण, विग्रहं सन्धिनां च विशेषण दूषयन्ति विनाशयन्ति विप्रलम्भं तु विनोददानेन विस्मार यन्ति इति 'विदुषकः'। उर्चितश्च लिंगी देवतानां ब्राह्मणस्य शिष्यः राज्ञां तु शिष्यवर्जास्त्रः । एवं वणिगादेरपीति ॥ (15)168 ॥

अथैषांद्मेव धीरोध्यृतादीनां सहायानाह -

युवराज - चमूनाथ - पुरोधः - सचिवादयः ।
सहाया एतदायत्तकर्मैव ललितः पुनाः ॥ (16) 169 ॥[2]

'आदि' शब्दादादविक - सामन्तादयस्त । पसादयश्य गृहयन्ते । एते च केचिदर्थकामयोः सहायाः। केचिद् धर्मसहायाः । तथा सहायायत्तसिध्दिूरेव धीरललितः सहायव्यापारश्च नाटकव्यापार एव, एताचद्रू पत्वान्नायकस्य । धीरोध्धतादयस्तु स्वअन्य - उभयसिध्दृयः रति ॥ (16 ) 169 ॥

अथ शुध्दृान्तोचितं परिवारमाह --

शुध्यृान्ते कारुको द्वाः स्थः कंचुकी शुभकर्मणि ।
वर्षवरस्तु रक्षायां निर्मुण्डः प्रेषणे स्त्रियाः ॥
कार्यारव्याने प्रतींहारी, रक्षा - स्वस्त्योर्महत्तया ।
पूर्वस्थितिविद्यौ वृध्यृा , चित्रादौ शिल्पकारिका ॥ (17) 170 ॥(18)171 ॥[3]

1. नाटयदर्पणम् चतुर्थो विचेक : श्लोक क्रमाक - (15) 168 पृष्ठ क्रमांक - 376
2. नाटयदर्पणम् चतुर्थो विचेक : श्लोक क्रमाक - (16) 169 पृष्ठ क्रमाक - 377
3 नाटयदर्पणम् चतुर्थो विचेक : श्लोक क्रमाक - (17-18) 170 -171 पृष्ठ क्रमाक - 378

शुध्यान्तमन्तः पुरं, तिस्मिन्नाचारवान् औं हीनसत्त्वः पुमान् ‘ कारकः ’। स द्वारपालो दक्षो नपुंसकः। ‘कचुकी’ अदूष्यजातिः स्त्रस्वाभावः। तुच्छ,सत्त्वो विनीतश्च ‘ वर्षवरः’ । अतिनिः सत्त्वोडक्र्मकश्च निर्मुण्डः। स च स्त्रीदास्यानां ‘चित्रे’ पत्र - वल्लयादि। ‘आदि’ शब्दाद् गन्ध - पुष्प - शिल्प - शप्या - आसन - च्छ्त्र - मण्डन - संवाहन - उचक्रीड - वयजनादिग्रह इति ॥ (17-18) 170 -171 ॥